National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(57): 235-238
© 2024 NJHSR
www.sanskritarticle.com

**फूलचन्दः**
शोधछात्रः, साहित्य विभागः,
राष्ट्रिय संस्कृतविश्विद्यालयः,
तिरुपतिः

**Correspondence:**
**फूलचन्दः**
शोधछात्रः, साहित्य विभागः,
राष्ट्रिय संस्कृतविश्विद्यालयः,
तिरुपतिः

# रत्नपाल चरिते रसविमर्शः

**फूलचन्दः**

**साराशः –**

श्रव्यकाव्यस्य पठने श्रवणे वा, दृश्यकाव्यस्य दर्शने श्रवणे वा यः अलौकिकानन्दः प्राप्यते, सः रसः इति कथ्यते। रसछन्दालङ्काराः काव्यरचनायां महत्त्वपूर्णावयवाः सन्ति।

रसपदं "रस आस्वादनस्नेहनयोः" इति धातोः अच् प्रत्यये कृते निष्पन्नं भवति। संस्कृतव्याकरणाधारेण अस्य व्युत्पत्तिः चतुर्धा कर्तुं शक्यते । यथा-

१) रस्यते आस्वाद्यते इति रसः। यथा परामात्मरूपः रसः, मधुरपदार्थः, सोमः, गन्धः, मधु इत्यादिपदार्थाः।[1]

२) रस्यते अनेनेति रसः । यथा- शब्दः रागः वीर्यम्, शरीराश्चादिः ।[2]

३) रसति रसयति वा रसः । यथा- पारदः, जलम्, शरीरम्, रसधातुः, अन्यानि द्रव्याणि पदार्थाः वा ।[3]

४) रसनं रसः आस्वादः । यथा शृङ्गारादिरसः ।[4]

**रसवैशिष्ट्यम् -**

**यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पफलं तथा ।**
**तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः ।।**[5]

इति अभिमन्त्रयता मुनिना भरतेन काव्यजगति रस एव प्राधान्येन व्यपदिष्टः। यथा हि-बीजात्प्रजायमानः वृक्षः पुष्पफलादिकं प्रसूयमानः विश्वं रसमयीकरोति, तथैव काव्यनाट्ययोः मूलरूपः कविगतो भावः (रसः) वृक्षस्थानीयं काव्यं वर्द्धयन् पुष्पादिस्थानीयमभिनयादिकं प्रसूय मधुरफलरसास्वादेन सामाजिकं समाह्लादयति। (तत्रैव वृत्तौ) अनेन विना काव्यं रसिकानां कृते नीरसमनादृतञ्च भवति । यथोच्यते-

**साधुपाके विनास्वाद्यं भोजनं निर्लवणं यथा।**
**तथैव नीरसं काव्यं स्यान्नो रसिकतुष्टये ।।**[6]

परमात्मनः सहोदरः रसः अज्ञानाभरणमुक्तः सत्यशिवसुन्दरस्वरूपः सच्चिदानन्दमयः। सत्यं शिवं सुन्दरञ्च तस्य स्वरूपम् । एतदेव दार्शनिकरहस्यम् । साहित्यदर्पणकारेण कविराजविश्वनाथेनोक्तम् -

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यः ब्रह्मास्वादसहोदरः ।।**
**लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।।**[7]

काव्यार्थतत्त्वज्ञाः सहृदया एव रसमास्वादयितुं प्रभवन्ति; नान्ये। तदुक्तं- "येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते सहृदयसंवादभाजः सहृदयाः भवन्ति।" (ध्वन्यालोकस्य लोचनटीकायाम्, प्रथमानने), सहृदया एव रसं ज्ञातुं प्रभवन्ति इत्यपि साहित्यदर्पणे उक्तं यथा- **"पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्"**[8] इति ।

**रत्नपालचरिते रसविचारः -**

रत्नपालचरिते अनेकरसानां सन्निवेशः अस्ति। परन्तु काव्येऽस्मिन् शान्तरसस्य प्राधान्यमस्ति। तत्त्वज्ञानादथवा निर्वेदवैराग्यात् शान्तरसस्योत्पत्तिः। कलिकालसर्वज्ञाचार्य हेमचन्द्रः तृष्णाक्षयरूपक्षमः स्थायिभाव युक्तो शान्तरसेति कथयतिः -

वैराग्यादिविभावो-**तृष्णाक्षयरूपः शमः स्थायीभावः प्राप्तः शांतोरसः**।[9]

शमस्थायिभावयुक्त-शान्तरसः मोक्षप्रवर्तकः इति कथ्यते । उक्तञ्च-

**अथ शान्तोनाम शमस्थायिभावात्मको मोक्षप्रवर्तकः।**

**स तु तत्त्वज्ञान वैराग्याशय शुद्धयादिभिर्विभावैः समुत्पद्यते।।**[10]

**शान्तरसः –**

**शान्तः शमस्थायीभावः उत्तमप्रकृतिर्मतः।**
**कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः।।**
**अनित्यत्वादिना शेषवस्तुनिस्सारता तु या।**
**परमात्मस्वरूपं वा तस्यालम्बनमिष्यते।।**
**पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः।**
**महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः।।**
**रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः।**
**निर्वेदहर्षस्मरणमतिभूतदयावयः।।**[11]

यस्य शमः स्थायिभावोऽस्ति सः "शान्तरसः" इत्युच्यते। उत्तमप्रकृतिजनाः एव अस्य रसस्य आस्वादनं कुर्वन्ति। अस्य वर्णः कुन्दपुष्पस्य तथा चन्द्रस्य सुन्दरच्छाया इव स्वच्छधवलः भवति। देवता अस्य भगवान् नारायणः अस्ति। संसारः अनित्यः आध्यात्मिक-आधिभौतिक-आधिदैविकादिदुःखमयः अस्ति, तस्मात् सांसारिक-विषयान् प्रति अरुचिः तेषां निस्सारतायाः ज्ञानं वा तथा च परमात्मनः स्वरूपज्ञानमेव शान्तरसस्य आलम्बनविभावः। पवित्राश्रमः, भगवतः लीलाभूमिः, तीर्थस्थानम्, रम्यकाननम्, साधुसङ्गतिश्चादयः अस्य उद्दीपनविभावाः, रोमाञ्चः, दया, संन्यस्ततादयः, अनुभावाः भवन्ति। निर्वेदः, हर्षः, स्मरणं, मतिः, धृतिः, भूतदया (सर्वजन्तुषु अनुकम्पा) औत्सुक्यादयः व्यभिचारिभावाः भवन्ति ।

रत्नपालचरितकाव्येऽस्योदाहरणं दृश्यते। राज्ञः वियोगे प्रकृतेः प्रत्येकेषु कणेषु रत्नपालस्य कल्पनां कुर्वती रत्नवती इदानीं शान्तरूपीनदीं साक्षात्कृत्य धन्यतां प्राप्तवती। ये प्रियाः आसन्, ते तत्त्वज्ञानस्य उदयमात्रेण निष्प्रयोजनाः अभवन् । लतया सह संभाषणं कृत्वा लोकस्य आडम्बरस्य उद्घाटनं द्रष्टव्यमस्ति । **यथा-**

**इति विलोक्य शिफे ! स्वदशां किमु, वहसि खेदमुपैसि कृशां गतिम् ।**
**गतिरियं जगतः सकलस्य यद्, भवति तद्गणना तव तत्र का ।।**[12]

अस्मिन् श्लोके शमः स्थायीभावः। संसारस्य अनित्यतातायाः ज्ञानं आलम्बनविभावः। जगतः गतिरीयमुद्दीपनविभावः। दया, धृतिः, इत्यादयः अनुभावाः। निर्वेदः, मतिश्चादयः व्यभिचारिणः। एतेषां सर्वेषां संयोगात् शान्तरसः श्लोकेऽस्मिन् अभिव्यज्यते तथा च

**प्राकल्पत प्रतिपलं मणिपालमेव, प्रालोकत प्रतिपदं समदृष्टि बिन्दुः**
**शुश्राव तदध्वनिमलं खलु साधुना हि,सर्वत्र शान्तरसमेक दृशेक्षमाणा ।।**[13]

अस्मिन् श्लोके शमः स्थायीभावः । संसारिक विषयान् प्रति अरूचिः आलम्बनविभावः। सर्वत्र (प्रकृतिः विषये सूच्यमाणः स्थानम्) उद्दीपनविभावः। समदृष्टिः, दया, इत्यादयः अनुभावाः। निर्वेदः, मतिश्चादयः व्यभिचारिणः। एतेषां सर्वेषां संयोगात् शान्तरसः श्लोकेऽस्मिन् अभिव्यज्यते । तथा च

**रामोतरो यो भजतेऽपि रामं, लसन् स्वदीप्त्या तुलसीगणेशः ।**
**स सर्वदानन्दविधायिवाण्या, सुधारसं सिञ्चतु मे सरण्याम् ।।**[14]

तथा च

**येषु विचारेषुल्लसतिस्म, दमनेच्छान्येषां मुहुरेव ।**
**तेषामेवविचारणा मथ, दमनं साम्प्रत महह विलोके ।।**[15]

तथा च

**या मानसलहरी विषयाब्धौ लहरीवोच्छलति नितान्तम् ।**
**साद्याकृष्टा शांतरसेन, रविकिरणेनेवाम्भोवीथिः ।।**[16]

**शृङ्गाररसः-**

काव्येऽस्मिन् प्रयुक्तानि विप्रलम्भशृङ्गारस्य कानिचन उदाहरणानि अधः प्रस्तूयन्ते। राज्ञः रत्नपालस्य अदृश्यकारणात् युवत्याः जनितं विरहं वर्द्धितम् । तत् कविना अत्र इत्थं वर्णितम् । यथा-

**नाऽशोकां कुरुषे किमशोक, मां च सशोकां प्रियविरहेण ।**
**लज्जास्पदमपि भविता सद्यो, नाम तवेदं गुणशून्यत्वात् ।।**[17]
**विसृद्दशकण्टकयोः समकालं, प्राप्तजन्मोर्निदर्शनेन ।**
**भाग्यविविधतां सूचयसि त्वं, किं न तथा मम पतिमपि बदरि ।।**[18]

**शेफालि! त्वं रात्रावेव, पुष्पप्रकर पतनमिषतो हि ।**
**वाष्पं क्षरसि च पश्य तदाऽहं, रात्रिं दिवमपि सदृशीकुर्वे ।।**[19]
**विविधैर्वृक्षैर्वृत कान्तार, किं न ज्ञापयसे विश्वेशम् ।**
**प्रच्छन्नं त्वयि केवलबोध- मिव बद्धात्मास्वस्मिंल्लीनम् ।।**[20]
**किं प्रमाणमिह भवत्प्रमाणं, वा नयमार्गः प्रतिपत्तव्यः ।**
**अंशग्राहित्वादुपयोगी, व्यवहर्तव्यो नयो नयज्ञैः ।।**[21]

**सहकार! त्वं भव सहकारी, कामितनिष्पत्तौ संपन्नः ।**

**कलरवमासादयति त्वतः, पिको न किं पतिमपि लप्स्येहम् ।।**[22]

एतादृशः चतुर्थे सर्गे बहवः श्लोकाः विप्रलम्भशृंगाररसयुक्ताः सन्ति ।

**वीररसः -**

**उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।**

**महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ।।**

**आलम्बनविभावास्तु विजेतव्यादयो मताः ।**

**विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।**

**अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ।।**

**सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।**

**स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ।।**[23]

यत्रोत्साहः स्थायीभावः भवति तत्र तेनोत्साहेन वीररसः ध्वन्यते । उत्तमप्रकृतिः जनः अस्य रसस्य आश्रयः भवति । अस्य वर्णः सुवर्णः, देवता महेन्द्रः। आलम्बनं विजेतव्यः शत्रु, उद्दीपनं शत्रोः चेष्टाः भवन्ति। अनुभावाः युद्धादिसामग्री अथवा अन्यान्यसाधना-नामन्वेषणम्। धृति-मति गर्व- स्मृति-तर्क-रोमाञ्चाः अस्य व्यभिचारि-भावाः । अस्य रसस्य चत्वारः भेदास्सन्ति ।

**यथा- १. दानवीरः, २. धर्मवीरः, ३. युद्धवीरः, ४. दयावीरः ।**

**धर्मवीरः -** स्तुतिविषयकः उत्साहः यत्र स्थायिभावो भवति तत्र धर्मवीररसः आस्वाद्यते । रत्नपालचरिते अस्योदाहरणं यथा-

**जय-जय वीर ! किरीटमणे! जय-जय दस्युतमोऽभ्रमणे।**

**जय-जय जगताऽगम्यगते, जय-जय सततं रम्यमते ।।**[24]

अस्मिन् उदाहृते श्लोके स्तुतिविषयकः उत्साहः स्थायीभावो भवति । अतः अत्र धर्मवीरः इति ज्ञायताम्। अस्य आलम्बनविभावः राजा रत्नपालः। दस्युतमोऽभ्रमणे जगताऽगम्यगते रम्यमते चानुभावोऽस्ति। राज्ञः उत्तमगुणाः रसमुद्दीपयन्ति। हर्ष-तर्कादयः व्यभिचारिणः विशिष्टेनाभिमुख्येनात्र चरन्ति । तथा च

**जय-जय सुकृतोम्भोजसरो, जय-जय वांछित कल्पतरो ।**

**जय-जय कविभिर्गी तनुते जय-जय सकलधराधिपते ।।**

तथा च

**जय-जय विजय श्री भर्तो, जय-जय नवमंगल कर्तो ।**

**जय-जय कम्पितशत्रुतते, जय-जय जगदुद्धारकृते ।।**[25]

एवमत्र स्तुत्योत्साहः धर्मवीररसरूपेण परिणमते, तस्य च आस्वादनं सहृदयैः सानन्दं क्रियते ।

**अद्भुतरसः-**

**अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः ।**

**पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।।**

**गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।**

**स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः ।।**

**तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः।**

**वितर्कावेगसंभ्रान्तिहर्षाद्याः व्यभिचारिणः।।**[26]

यस्य विस्मयस्थायीभावः, गन्धर्वः देवता, वर्णश्च पीतः भवति तत्र "अद्भुतरसः " निष्पद्यते । अस्य लोकाद्भिन्नम् इन्द्रजालादिकं वस्तु आलम्बनविभावोऽस्ति। तेषां वस्तूनां गुणमहिमा उद्दीपनं भवति। स्तम्भः(जाड्यम्), स्वेदः, रोमाञ्चः, गद्गदस्वरः, सम्भ्रमः वेगाश्च इमे तथा नेत्रप्रकाशादयः अनुभावाः भवन्ति। वितर्कः, आवेग, सम्भ्रान्तिर्जडत्वं, हर्षः, औत्सुक्यादयश्च व्यभिचारिणः भवन्ति । भरतमुनिः अद्भुतरसस्य भेदद्वयं भणति। यथा दिव्याद्भुतः, आनन्दजाद्भुतश्चेति । दिव्यस्य दर्शनात् दिव्यान्द्भुतरसोत्पत्तिर्जायते तथा च हर्षमयविस्मयात् आनन्दाद्भुतरसोत्पत्तिर्भवति । यथोक्तं तेन-

**दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रसः ।**

**दिव्यदर्शनजो दिव्यो हर्षादानन्दजः स्मृतः ।।**[27]

रत्नपालचरिते अस्योदाहरणं यथा-

**वाणीमिमां प्रेमरसानुकूलां, श्रुत्वाश्रितश्चित्ररसस्य चूलां ।**

**सहाङ्कुरां तद्हृदयोर्वरां स तत्प्रश्नवर्षेण चकार चारु ।।**[28]

अस्मिन् श्लोके विस्मयः स्थायीभावः। युवति आलम्बनविभावः। हृदयोर्वरा सहाङ्कुरा, प्रेमरसानुकुला वाणी च उद्दीपनविभावः। रोमाञ्च, आश्चर्यः इत्यादयः अनुभावास्तथा च औत्सुक्यं, हर्षः इत्यादयः व्यभिचारिभावाः सन्ति। विभाव-अनुभावव्यभिचारी-भावानां मेलनेन अत्र अद्भूतरसः इति ज्ञायते।

एवं निष्कर्षरूपेण अत्र सुस्पष्टं भवति यत् - रत्नपालचरितकाव्ये कविः रसपाकमत्युत्तमतया कृतवान्। प्रधानरसरूपेण शान्तरसस्य अभिव्यञ्जना सहृदयसंवेद्या भवति। गौणरसत्वेन विप्रलम्भशृंगार-धर्मवीर-अद्भुतरसानां परिपाको वर्तते। महाकाव्येऽस्मिन् स्थलविशेषे आवेग दैन्य-स्वप्न-गर्व-अमर्ष-हर्ष-ग्लान्यादयः भावाः, भावशान्तिः, भावोदयः, भावसन्धिश्चेत्यादीनां सुयोजना दृष्टिगोचरा भवति।

**संदर्भ ग्रंथ सूची -**

1. **अलंकार शेखर।** केशव मिश्रः। प्रका. जयकृष्णदासः एवं हरिदासगुप्तः। चौखम्बा संस्कृत सीरिज ऑफिस, बनारस
2. **काव्यानुशासनम्।** हेमचन्द्रः। सम्पा. पण्डित शिवदत्त शर्मा। गोपीनाथ पुरोहित पुस्तकालयः वनस्थली विद्यापीठम्।
3. **नाट्यशास्त्रम्।** भरतमुनि। सम्पा. डॉ. पारसनाथ द्विवेदी। सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, द्वितीय संस्करणम् (4 भाग में प्रकाशित)
4. **रत्नपालचरितम्।** आचार्य महाप्रज्ञ। जैन विश्वभारती संस्थान लाडनूं (राज.)
5. **साहित्यदर्पणम्।** श्रीविश्वनाथः। व्याख्या डॉ. त्रिलोकीनाथ द्विवेदी। आचार्य लोकमणिदहालः। चौखम्बा सुरभारती प्रकाशन, वाराणसी
6. **संस्कृत साहित्य शास्त्र कोशः** । सम्पा. प्रभाकर आचार्य। राष्ट्रीय साहित्य संस्थान

**संदर्भः**

1. संस्कृत साहित्य शास्त्र कोषः पृष्ठ 1038
2. संस्कृत साहित्य शास्त्र कोषः पृष्ठ 1038
3. संस्कृत साहित्य शास्त्र कोषः पृष्ठ 1038
4. संस्कृत साहित्य शास्त्र कोषः पृष्ठ 1038
5. नाट्य शास्त्र – 6.38
6. अलङ्कारशेखरः – 10
7. साहित्यदर्पणम् – 3.21
8. साहित्यदर्पणम् – 3. पृष्ठ 87
9. काव्यानुशासनम् – 2.17
10. नाट्यशास्त्रे 6.1 – 5
11. साहित्यदर्पम् 3.245 – 248
12. रत्नपालचरितम् 5.38
13. रत्नपालचरितम् 5.28
14. रत्नपालचरितम् (मङ्गलाचरणम् 4)
15. रत्नपालचरितम् – 5.11
16. रत्नपालचरितम् – 5.15
17. रत्नपालचरितम् – 4.4
18. रत्नपालचरितम् – 4.5
19. रत्नपालचरितम् – 4.6
20. रत्नपालचरितम् – 4.1
21. रत्नपालचरितम् – 4.2
22. रत्नपालचरितम् – 4.3
23. साहित्यदर्पणम् – 3.232 – 234
24. रत्नपालचरितम् 1.22
25. रत्नपालचरितम् 1.23
26. साहित्यदर्पणम् 3.242 – 245
27. नाट्यशास्त्र 7.82
28. रत्नपालचरितम् – 2.5